# 16. षोडशः पाठः

## ग्रीष्मावकाशः

लङ्लकारः, भूतकालः

विजयः - अजय ! ग्रीष्मावकाशे त्वं कुत्र अगच्छः ?

अजयः - विजय ! अहं ग्रीष्मावकाशे अरुणाचलप्रदेशम् अगच्छम् ।

विजयः - अहो ! अतिरमणीयः सः प्रदेशः ।

अजयः - आम्, तत्र याक-पशुम् अपश्यम् । दिग्फुरी-नदीम् अपश्यम् ।

विजयः - किं त्वं गोम्पा-मन्दिरं न अपश्यः ?

अजयः - मया सह मम जननी जनकः च आस्ताम् । वयं सर्वे गोम्पा-मन्दिरम् अगच्छाम ।

विजयः - यूयं कदा ततः आगच्छत ?

अजयः - वयं गतमासे आगच्छाम ।

विजयः - किं तव पितामहः पितामही च तत्र न अगच्छताम् ?

अजयः - न । तौ हरिद्वारम् अगच्छताम् । तत्र गङ्गायां स्नानम् अकुरुताम् । भारतमाता इति मन्दिरम् अपश्यताम् ।

विजयः - अहो ! रम्या अस्माकं भारतभूमिः ।

अजयः - आम्, न केवलं रम्या, अपि तु तपोभूमिः ज्ञानभूमिः च ।